"या आपोनिमित्तेन प्राप्यन्ते ता नैमित्तिक्यः यथा गोरुखग्राः आतपवर्ष्यास्तासामस्मिन् काले ग्रहणासम्भवात् अतः पूर्व्वं गृहीत्वा यूपमुत्तरेण पुनर्ग्रहणमिति" कर्कः। अतएव श्रुत्या वृष्टेरातपनिमित्तत्वमुक्तम् "तस्माद्यत्र क्वचित् शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापोजायन्ते" इति छा॰उ॰ पुरुषदेहस्य सन्ताप स्वेदयोरातपनिमित्तत्वात् वृष्टेरातपहेतुकत्वम्। व्यक्तमाह यादवः "तासां शतानि चत्वारि रश्मीनां वृष्टिसर्ज्जने चतुः शतं वृष्टिवाहाः सर्व्वास्ता अमृताः स्त्रियः" इति सूर्य्यरश्मीनां मध्ये चतुःशतस्य वृष्टिसर्ज्जकत्वेन वृष्टेरातपनिमित्तकत्वमत्र व्यक्तमेव।

**आतपवारण** न॰ आतपं वारयति वृ—णिच् ल्यु। छत्रे। "नृपतिककुदं दत्त्वा यूने सितातपवारणम्" "अनुदितान्यसितातपवारणम्" इति च रघुः।

**आतपात्यय** पु॰ ६त॰। रौद्रापगमे सूर्य्यकिरणविगमे। "आतपात्ययसंक्षिप्तनीवारासु निषादिभिः" रघुः।

**आतपाभाव** ६त॰ पु॰ आतपस्याभावरूपायाम् छायायाम्।

**आतपीय** त्रि॰ आतपस्य सन्निकृष्टदेशादि उत्करा॰ छ। आतपसन्निकृष्टदेशादौ।

**आतपोदक** न॰ आतपे लक्ष्यमाणमुदकम् शा॰त॰। सूर्य्यमरीचौ–लक्ष्यमाणे उदके मृगतृष्णिकायाम्।

**आतमाम्** अव्य॰ आ+तमप् आमु। अतिशयाभिमुख्ये अत्यन्तसमन्ताद्भावे च "महोदेवं कथमातमाऽख्यायत आत्मा हि महदुक्थम्" शत॰ब्रा॰।

**आतर** पु॰ आतरत्यनेन आ+तॄ—अप्। नद्यादेःतरणार्थं देये शुल्के "आतरलाघवहेतोर्मुरहर! तरणिं तवावलम्बे" इत्युद्भटः द्रव्यभेदे आतरमानमुक्तं मनुना "पणं यानन्तरे दाप्यम्पुरुषोऽर्द्धपणन्तरे। पादम्पशुश्च योषिच्च पादार्द्धं रिक्तकः पुमान्। भाण्डपूर्णानि यानानि तार्य्यं दाप्यानि सारतः। रिक्तभाण्डानि यत् किञ्चित् पुमांसश्चापरिच्छदाः"

**आतर्पण** न॰ आ+तृप–ल्युट्। १तृप्तौ। णिच्–ल्युट्। २प्रीणने ३मङ्गलालेपने। कर्त्तरि ल्युट्। ४तृप्तिकारके त्रि॰।

**आतव** पु॰ आ+तु—अप्। १हिंसने कर्त्तरि अच्। २हिंसके त्रि॰ ३राजभेदे पु॰ तस्यापत्यम् अश्वा॰फक्। आतवायनः तदपत्ये पुंस्त्री॰।

**आता** स्त्री आभिमुख्येन अत्यते गम्यते प्राणिभिः आ+अत—कर्म्मणि घञ्। दिशि निरु॰। 'प्रये ह्निताद्दिव अञ्जन्त्याताः" ऋ॰२,४२,६।

**आतान** पु॰ आतन्यते आ+तन-घञ्। १आभिमुख्येन विस्तारे २दीर्घविस्तारे पटादिवयनार्थं दीर्घविस्तारे (टाना देओया) "यथा लूता आतानवितानाभ्यां जालं विस्तारयतीति" वेदान्तप्र॰ कर्म्मणि घञ्। ३विस्तार्य्ये ४क्रियमाणे च "एष एव नित्य एकाहातानः" शत॰ब्रा॰।

**आतानक** त्रि॰ आ+तन—ण्वुल्। विस्तारके।

**आतापि** पु॰ आ+तप इण्। असुरभेदे स चागस्त्येन भक्षितः "आतापिर्भक्षितोयेन वातापिश्च महासुरः। समुद्रःशोषितोयेन स मेऽगस्त्यः प्रसीदतु" मन्त्रलिङ्गादवगम्यते।

**आतापिन्** पु॰ आतपति आ+तप–णिनि। (चिल) पक्षिभेदे क्षीरस्वामी।

**आतायिन्** पु॰ आ+ताय–णिनि। (चिल्)इतिख्याते पक्षिभेदे।

**आतार** पु॰ आतीर्य्यतेऽनेन आ+तॄ—बा॰ घञ्। नावातरणार्थं देवे शुल्के।

**आताली** अव्य॰ आ+तल बा॰ ईण्। विधुरस्याकुलीकरणेऽर्थ्या॰ "आतालीकृत्य विधुरमाकुलीकृत्येत्यर्थः" गणरत्नम्।

**आति** पु॰ अत—इण्। शरारिपक्षिणि। "सुपर्णः पार्ज्जन्य आतिर्वाहसो" यजु॰ २४,३४। "ता आतयोन तन्वः शुम्भतः स्वा" ऋ॰ १८,६५। २सततगन्तरि त्रि॰।

**आतिथिग्व** पु॰ अतिथिमभिगच्छति गम—ड्व अतिथिग्वो–दिवोदासोराजा तस्यापत्यम् अण्। दिवोदासराजपुत्रे। "पराहन्नतिथिग्वाय शस्यं करिष्यन्" ऋ॰६,२६,३ "अतिथिग्वाय अतिथीनामभिगन्त्रे दिवोदासाय" भाष्योक्तेः दिवोदास एव ऋग्वेदेऽतिथिग्वत्वेन प्रसिद्धः "सुरथाँ आतिथिग्वे स्वभीशूँ रार्क्षे" "षड्श्वाँ आतिथिग्व इन्द्रोते बधूमतः" ऋ॰ ८,६८,१६,१७। "आतिथिग्व एतन्नामकराजस्य पुत्रः तस्मै" भा॰।

**आतिथेय** न॰ आतिथये इदं ढक्। १अतिथिनिमित्तके भोजनादौ। "आतिथेयमनिवारितातिथिः" माघः "दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु" मनुः। तत्र साधु ढञ्। २अतिथिसपर्य्यायां कुशले त्रि॰। "प्रययावातिथेयेषु वसन्नृषिकुलेषु सः" रघुः। "शय्योत्थायं मृगान् विध्यन्नातिथेयो विचक्रमे" भट्टिः "प्रत्युज्जगामातिथिमातिथेयः" रघुः। स्त्रियां ङीप्। "तमातिथेयी बहुमानपूर्व्वया" कुमा॰

**आतिथ्य** न॰ अतिथेरिदं ञ्य। १अतिथिपरिचर्य्यायाम्। "तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम्" रघुः "लघुपतनकस्य यथोचितमातिथ्यं विधाय" हितो॰। स्त्रीत्वमपि "आतिथ्यायाः प्राक्प्रायणीयम्"" शत॰ब्रा॰ भाष्यम्